श्री सूर्य नामवर्णन स्तोत्रं (भविष्यपुराणे)

श्री सूर्य नामवर्णन स्तोत्रं (भविष्यपुराणे)

ब्रह्मोवाच |
नामभिः संस्तुतो देवो यैरर्कः परितुष्यति |
तानि ते कीर्तयाम्येष यथावदनुपूर्वशः || 1 ||

नमः सूर्याय नित्याय रवये कार्यभानवे |
भास्कराय मतंगाय मार्तंडाय विवस्वते || 2 ||

आदित्यायादिदेवाय नमस्ते रश्मिमालिने |
दिवाकराय दीप्ताय अग्नये मिहिराय च || 3 ||

प्रभाकराय मित्राय नमस्तेऽदितिसंभव |
नमो गोपतये नित्यं दिशां च पतये नमः || 4 ||

नमो धात्रे विधात्रे च अर्यम्णे वरुणाय च |
पूष्णे भगाय मित्राय पर्जन्यायांशवे नमः || 5 ||

नमो हितकृते नित्यं धर्माय तपनाय च |
हरये हरिताश्वाय विश्वस्य पतये नमः || 6 ||

विष्णवे ब्रह्मणे नित्यं त्र्यंबकाय तथात्मने |
नमस्ते सप्तलोकेश नमस्ते सप्तसप्तये || 7 ||

एकस्मै हि नमस्तुभ्यमेकचक्ररथाय च |
ज्योतिषां पतये नित्यं सर्वप्राणभृते नमः || 8 ||

हिताय सर्वभूतानां शिवायार्तिहराय च |
नमः पद्मप्रबोधाय नमो द्वादशमूर्तये || 9 || [वेदादिमूर्तये]

कविजाय नमस्तुभ्यं नमस्तारासुताय च |
भीमजाय नमस्तुभ्यं पावकाय च वै नमः || 10 ||

धिषणाय नमो नित्यं नमः कृष्णाय नित्यदा |
नमोऽस्त्वदितिपुत्राय नमो लक्ष्याय नित्यशः || 11 ||

एतान्यादित्यनामानि मया प्रोक्तानि वै पुरा |
आराधनाय देवस्य सर्वकामेन सुव्रत || 12 ||

सायं प्रातः शुचिर्भूत्वा यः पठेत्सुसमाहितः |
स प्राप्नोत्यखिलान् कामान् यथाहं प्राप्तवान् पुरा || 13 ||

प्रसादात्तस्य देवस्य भास्करस्य महात्मनः |
श्रीकामः श्रियमाप्नोति धर्मार्थी धर्ममाप्नुयात् || 14 ||

आतुरो मुच्यते रोगाद्बद्धो मुच्येत बंधनात् |
राज्यार्थी राज्यमाप्नोति कामार्थी काममाप्नुयात् || 15 ||

एतज्जप्यं रहस्यं च संध्योपासनमेव च |
एतेन जपमात्रेण नरः पापात् प्रमुच्यते || 16 ||

इति श्रीभविष्यमहापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे ब्रह्मप्रोक्त सूर्य नाम वर्णनं नामैकसप्ततितमोऽध्यायः ||